**समुत्पत्ति** स्त्री सम्+उद्+पद–क्तिन् । समुद्भवे ।

**समुत्पन्न** त्रि॰ सम्+उद्+पद–क्त । समुद्भूते ।

**समुत्पाट** पु॰ सम्+उद्+चु॰पट–अच् । उन्मूलीकरणे ।

**समुत्पाटित** त्रि॰ सम्+उद्+चु–पट–क्त । उन्मूलिते ।

**समुत्पिञ्ज** त्रि॰ सम्+उद्+पिञ्ज–अच् । १अत्याकुले हेमच॰ २आकुलसैन्ये पु॰ अमरः ।

**समुत्सर्ग** पु॰ सम+उद्+सृज–घञ् । सम्यक्त्यागे ।

**समुत्सुक** त्रि॰ सम्यगुत्सुकः प्रा॰स॰ । १अत्यन्तोत्सुके इष्टवस्तुलाभाय त्वरान्विते ।

**समुत्सृष्ट** त्रि॰ सम्+उद्+सृज–क्त । सम्यक्त्यक्ते ।

**समुत्सेध** पु॰ सम्+उद्+सिध–घञ् । १अत्युन्नतौ २अतिस्फीततायाञ्च । [अमरः ।

**समुदक्त** त्रि॰ सम्+उद्+अन्च–क्त । कूपादेरुद्धृतजलादौ

**समुदय** पु॰ सम्+उद्+इण–अच् । १समूहे अमरः २युद्धे ३समुद्गमे मेदि॰ ४दिवसे शब्दर॰ । ज्योतिषोक्ते ५लग्ने न॰ । ६षड्नाडीचक्रस्थे जन्मतारवधिके अष्टादशनक्षत्रे चक्रशब्दे दृश्यम् । वञ्जलः समूहे युद्धे पु॰अमरः । पृष्ठस्थसैन्ये अजयः अभ्युन्नतौ मेदि॰ ।

**समुदागम** पु॰ सम्+उद्+आ+गम–घञ् न वृद्धिः । सम्यग्ज्ञाने त्रिका॰ । [त्रिका॰ । २सम्यगाचारे च ।

**समुदाचार** पु॰ सम्+उद्+आ–चर–घञ् । १अभिप्राये

**समुदित** त्रि॰ सम्+उद्+इण्–क्त । १प्राप्तसंभूतौ पदार्थे सम+वद–कर्मणि क्त । २सम्यक्कथिते ।

**समुदीरण** न॰ सम्+उद्+ईर–क्त । सम्यक्कथने ।

**समुदीरित** पु॰ सम्+उद्+ईर–क्त । सम्यक्कथिते ।

**समुद्ग** पु॰ सम्+उद्+गम–ड । १सम्पुटके हेमच॰ २संश्लेषकारकदार्थे ३उद्गेन सहिते । स्वार्थे क । तत्रैव अमरः

**समुद्गम** पु॰ सम्+उद्+गम–घञ् न वृद्धिः । १ऊर्द्धगतौ २समुद्भवे च ।

**समुद्गीत** त्रि॰ सम्+उद्+गै–क्त । उच्चैर्गीते । [थिते च ।

**समुद्गीर्ण** त्रि॰ सम+उद+गॄ–क्त । १वमिते २उत्तोलिते ३क-

**समुद्दिष्ट** त्रि॰ सम्यक् उद्दिष्टम् उद्+दिश–क्त । सम्यगुद्देशविषये पदार्थे "तत्समुद्दिष्टं कर्मेति" संक्षिप्तसारः ।

**समुद्देश** पु॰सम्यक् उद्देशः उद्+दिश–घञ् । सम्यगभिसन्धौ । २सम्यगुद्देशे च यथा "वाक्यवादो जातिसमुद्देशे" मञ्जूषा

**समुद्धत** त्रि॰ सम्+उद्+हन–क्त । १अत्यन्तप्रगल्भे अत्यन्ताविनीते अमरः २समुद्गीर्णे हेमच॰ ।

**समुद्धरण** न॰ सम्+उद्+हृ–ल्युट् । १उत्तोलने कूपादेर्जलोत्तोलने २भुक्तान्नस्य वमने ३उन्मूलने च । कर्मणि ल्युट् । ४वान्ते·अन्नादौ ५उन्मूलिते च अमरः ।

**समुद्धृत** त्रि॰ सम्+उद्+हृ–क्त । १अपनीते २समुत्कीर्णे मेदि॰ ३उत्तोलिते ४उन्मूलिते च ।

**समुद्धर्तृ** त्रि॰ सम्+उद्+हृ–तृच् । १वमनकारिणि २उन्मूलयितरि ३उत्थापके ४हृतद्रव्यस्य पुनरादानकर्त्तरि च

**समुद्भव** पु॰ सम्+उद्+भू–अप् । समुत्पत्तौ ।

**समुद्भूत** त्रि॰ सम्+उद्+भू–क्त । समुत्पन्ने ।

**समुद्यत** त्रि॰ सम्+उद्+यम–क्त । सम्यगुद्यमयुते ।

**समुद्यम** त्रि॰ सम्+उद्+यम–घञ् न वृद्धिः । सम्यक्प्रयत्ने ।

**समुद्र** पु॰ सम्+उन्द–क्लेदने रक्, सम्+उद्+रा–क वा । १स्वनामख्याते प्रचुरजले सागरे अमरः । सह मुद्रया २मुद्रासहिते त्रि॰ "बभौ मरुत्वान् विकृतः समुद्रः बभौ मरुत्वान् विकृतः समुद्रः" इति भट्टिः । ३शट्यां ४शम्याञ्च स्त्री टाप् राजनि॰ । सागरस्य ब्रह्मणो मेढ्रात् उद्भवः "आस्यात् वाक्, सिन्धवो मेढ्रात्" भाग॰ २।१२ अ॰ । स च सप्तविधः "लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः" समुद्रनामनिरुक्तिः तद्वृद्ध्यादिकारणञ्च मत्स्यपु॰ १२२ अ॰ उक्तं यथा "अपाश्चैव समुद्रेकात् समुद्र इति संस्थितः । उदयतीन्दौ पूर्णे तु समुद्रः पूर्य्यते सदा । प्रक्षीयमाणे बहुले क्षीयतेऽस्तमिते च वै । आपूर्य्यमाणो ह्युदधिरात्मनैवापि पूर्य्यते । ततो वै क्षीयमाणे तु स्वात्मन्येव ह्यपां क्षयः । उद्दीप्यन्तेऽग्निसंयोगादुखास्थापो यथा स्वयम् । तथा स्वतः समुद्रोऽपि वर्द्धते शशिनोदये । अन्यूनानतिरिक्तात्वात् वर्द्धन्त्यापो ह्रसन्ति च । उदयेऽस्तमये चेन्दोः पक्षयोः शुक्लकृष्णयोः । क्षयवृद्धी समुद्रस्य शशिवृद्धिक्षये तथा । दशोत्तराणि पञ्चाङ्गुलानां शतानि च । अपां वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्वसु" ।

**समुद्रकफ** पु॰ समुद्रस्य कफ इव । जलधिफेने त्रिका॰ ।

**समुद्रकान्ता** स्त्री ६त॰ । १पृक्कायां राजनि॰ । २नद्याञ्च हला॰ समुद्रप्रियादयोनद्याम् ।

**समुद्रगा** स्त्री समुद्रं गच्छति गम–ड । १नद्यां हेमच॰ । "सर्वा नद्यः समुद्रगाः" इति पुराणम् । साक्षात् परम्परया वा सर्वासां जलधिगामित्वात् तथात्वम् । साक्षात् समुद्रगा च गङ्गादिः "सर्वा नद्यो रजोयुक्ता वर्जयित्वा समुद्रगाः" इति प्रा॰ त॰ । गङ्गाया एव चतस्रो धाराः सीतालकनन्दावङ्क्षुभद्राख्यतया ख्याताः